## न लिङि । (३९/२५२९)

[1]वृतः उत्तरस्य इटो लिङि[2] दीर्घो न भवति । विवरिषीष्ट । प्रावरिषीष्ट । आस्तरिषीष्ट । विस्तरिषीष्ट ॥

## सिचि च परस्मैपदेषु । (४०/२३९२)

परस्मैपदपरे सिचि वृत उत्तरस्य इटो दीर्घः न भवति[3] । प्रावारिष्टाम् । प्रावारिषुः । [4]अतारिष्टाम् । अतारिषुः । आस्तारिष्टाम् । आस्तारिषुः । परस्मैपदेषु इति किम् ? प्रावरिष्ट, प्रावरीष्ट ॥

## इट् सनि वा । (४१/२६२५)

[5]वृतः सनि वा इडागमो भवति । वुवूर्षते, विवरिषते, विवरीषते । प्रावुवूर्षति, प्राविवरिषति, प्राविवरीषति । ॠकारान्तेभ्यः–तितीर्षति, तितरिषति, तितरीषति । आतिस्तीर्षते, आतिस्तरिषते, आतिस्तरीषते । 'सनि ग्रहगुहोश्च' (७. २. १२/२६१०) इति इट्प्रतिषेधे प्राप्ते [6]पक्षे इडागमो विधीयते । [7]इटश्च 'वृतो वा' (७. २.३८/२३९१) इति पक्षे दीर्घः । चिकीर्षति, जिहीर्षति इत्यत्रोपदेशाधिकारात् लाक्षणिकत्वाच् [8]च इडागमो न भवति ॥

## लिङ्सिचोरात्मनेपदेषु । (४२/२५२८)

[9]वृतो [10]लिङि सिचि च आत्मनेपदपरे वा इडागमो भवति । वृषीष्ट, वरिषीष्ट । प्रावृषीष्ट, प्रावरिषीष्ट । आस्तरिषीष्ट, आस्तीर्षीष्ट । सिचि खल्वपि – अवृत, अवरिष्ट, अवरीष्ट । प्रावृत, प्रावरिष्ट, प्रावरीष्ट । [11]आस्तीर्ष्ट, आस्तरिष्ट, आस्तरीष्ट । आत्मनेपदेषु इति किम् ? प्रावारिष्टाम् । प्रावारिषुः । [12]लिङः प्रत्युदाहरणं न दर्शितम्, असम्भवात् यासुटोऽवलादित्वात् इति ॥

## ऋतश्च संयोगादेः । (४३/२५२६)

[13]ऋदन्ताद् धातोः संयोगादेः उत्तरयोः लिङ्सिचोरा[14]त्मनेपदेषु वा इडागमो भवति । [15]ध्वृषीष्ट, ध्वरिषीष्ट । स्मृषीष्ट, स्मरिषीष्ट । [16]अध्वृषाताम्, अध्वरिषाताम् । अस्मृषाताम्, अस्मरिषाताम् । ऋत इति किम् ? च्योषीष्ट । प्लोषीष्ट । [17]अच्योष्ट । [18]अप्लोष्ट । संयोगादेः इति किम् ? कृषीष्ट[19] । [20]हृषीष्ट । अकृत । अहृत । आत्मनेपदेषु इत्येव, अध्वार्षीत् । अस्मार्षीत् । संस्कृषीष्ट, समस्कृत इत्यत्रोपदेशाधिकारात्, अभाक्तत्वाच्च सुट [21]इडागमो न भवति ॥

---

1. वृत इति वर्तते इत्यधिकम् क. 2. परतः इत्यधिकम् क. 3. प्रावरिषीष्ट इत्यधिकम् क. 4. व्यशारिष्टाम् व्यशारिषुः इत्यधिकम् ब. क. ह. 5. उत्तरस्य सनि प्रत्यये परतः क, उत्तरस्य इत्यधिकम् इ. ई. 6. पक्षे नास्ति क. 7. इट्पक्षे क. 8. वा क. ह. 9. वृत इति वर्तते इत्यधिकम् क. 10. उत्तरे इत्यधिकम् क. 11. ॠकारान्तरेभ्यः इत्यधिकम् क. 12. वाक्यमिदं नास्ति क. ब. 13. ऋकारान्तात् ब. क. 14. आत्मनेपदे क. 15. वृषीष्ट वरिषीष्ट क. 16. सिचः खल्वपि इत्यधिकम् ब. क. 17. नास्ति ई. 18. नास्ति क. 19. अकृषत इत्यधिकम् ई. ब. ह, वृषीष्ट अवृषत इत्यधिकम् क. 20. नास्ति ई. 21. इतीट् क.